योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०४०

चत्वारिंशः सर्गः ४०

श्रीवसिष्ठ उवाच ।

एवं निशाचराचारचिरघोरे रणाङ्गणे ।

अहनीव जनाचारे स्थिते यामावरेहिते ।। १

हस्तहार्यतमःपिण्डस्फुटकुड्ये निशागृहे ।

लाभोच्छदोच्चलचते भूतसङ्घे प्रवल्गति ।। २

निःशब्दे ध्वान्तसंचारे निद्रारुद्धककुब्गणे ।

लीलापतिरुदारात्मा किंचित्खिन्नमना इव ।। ३

प्रातःकार्यं विचार्याशु मन्त्रिभिर्मन्त्रकोविदैः ।

दीर्घचन्द्रसमाकारे शयने हिमशीतले ।। ४

चन्द्रोदरनिभे चारुगृहे शिशिरकोटरे ।

निद्रां मुहूर्तमगमन्मुद्रितेक्षणपुष्करः ।। ५

अथ ते ललने व्योम तत्परित्यज्य तद्गृहम् ।

रन्ध्रैर्विविशतुर्वातलेखेऽब्जमुकुलं यथा ।। ६

श्रीराम उवाच ।

कियन्मात्रमिदं स्थूलं शरीरं वाग्विदांवर ।

रन्ध्रेण तन्तुतनुना कथमाश्वाविशत्प्रभो ।। ७

श्रीवसिष्ठ उवाच ।

आधिभौतिकदेहोऽहमिति यस्य मतिभ्रमः ।

तस्यासावणुरन्ध्रेण गन्तुं शक्नोति नानघ ।। ८

रोधितोऽहमनेनेति न माम्यत्रेति यस्य धीः ।

अनुभूतानुभवती भवतीत्यनुभूयते ।। ९

येनानुभूतं पूर्वार्धं गच्छामीति स तत्क्रियः ।
कथं भवति पश्चार्धं गमनोन्मुखचेतनः ।। १०
नहि वार्यूर्ध्वमायाति नाधो गच्छति पावकः ।
या यथैव प्रवृत्ता चित्सा तथैव प्रतिष्ठिता ।। ११
छायायामुपविष्टस्य कुतस्तापानुभूतयः ।
यस्य संवेदनेऽन्योऽर्थः केनचिन्नानुभूयते ।। १२
यथा संवित्तथा चित्तं सा तथावस्थितिं गता ।
परमेण प्रयत्नेन नीयतेऽन्यदशां पुनः ।। १३
सर्पैकप्रत्ययो रज्ज्वामसर्पप्रत्यये बलात् ।
निवर्ततेऽन्यथा त्वेष तिष्ठत्येव यथास्थितः ।। १४
यथा संवित्तथा चित्तं यथा चित्तं तथेहितम् ।
बालं प्रत्यपि संसिद्धमेतत्को नानुभूतवान् ।। १५
यः पुनः स्वप्नसंकल्पपुरुषः प्रतिमाकृतिः ।
आकाशमात्रकाकारः स कथं केन रोध्यते ।। १६
चित्तमात्रं शरीरं तु सर्वस्यैव हि सर्वतः ।
विद्यते वेदनाच्चैतत्क्वचिदेतीव हृद्गतात् ।। १७
यथाभिमतमेवास्य भवत्यस्तमयोदयम् ।
आदिसर्गे स्वभावोत्थं पश्चाद्द्वैतैक्यकारणम् ।। १८
चित्ताकाशं चिदाकाशमाकाशं च तृतीयकम् ।
विद्ध्येतत्त्रयमेकं त्वमविनाभावनावशात् ।। १९
एतच्चित्तशरीरत्वं विद्धि सर्वगतोदयम् ।
यथासंवेदनेच्छत्वाद्यथासंवेदनोदयम् ।। २०
वसति त्रसरेण्वन्तर्ध्रियते गगनोदरे ।
लीयतेऽङ्कुरकोशेषु रसीभवति पल्लवे ।। २१
उल्लसत्यम्बुवीचित्वे प्रनृत्यति शिलोदरे ।
प्रवर्षत्यम्बुदो भूत्वा शिलीभूयावतिष्ठते ।। २२

यथेच्छमम्बरे याति जठरेऽपि च भूभृताम् ।

अनन्तराकाशवपुर्धत्तेऽथ परमाणुताम् ।। २३

देहस्यान्तर्बहिरपि दधद्वनतनूरुहम् ।। २४

भवत्याकाशमाधत्ते कोटीः पद्मजसद्मनाम् ।

अनन्याः स्वात्मनोऽम्भोधिरावर्तरचना इव ।। २५

अनुद्विग्नप्रबोधोऽसौ सर्गादौ चित्तदेहकः ।

आकाशत्मा महान्भूत्वा वेत्ति प्रकृततां ततः ।।२६

असत्यमेव वारित्वं बुद्ध्योदेतीव तत्तथा ।

वन्ध्यापुत्रोऽयमस्तीति यथा स्वप्ने भ्रमो नरः ।। २७

श्रीराम उवाच

किं चित्तमेतद्भवति किंवा भवति नौ कथम् ।

कथमेव न सद्रूपं नान्यद्भवति वीक्षणात् ।। २८

श्रीवसिष्ठ उवाच

प्रत्येकमेव यच्चित्तं तदेवंरूपशक्तिकम् ।

पृथक्प्रत्येकमुदितः प्रतिचित्तं जगद्भ्रमः ।। २९

क्षणकल्पजगत्संघा समुद्यन्ति गलन्ति च ।

निमेषात्कस्यचित्कल्पात्कस्यचिच्च क्रमं श्रृणु ।। ३०

मरणादिमयी मूर्च्छा प्रत्येकेनानुभूयते ।

यैषा तां विद्धि सुमते महाप्रलययामिनीम् ।। ३१

तदन्ते तनुते सर्गं सर्व एव पृथक्पृथक् ।

सहजस्वप्नसंकल्पान्संभ्रमाचलनृत्यवत् ।। ३२

महाप्रलयरात्र्यन्ते चिरादात्ममनोवपुः ।

यथेदं तनुते तद्वत्प्रत्येकं मृत्यनन्तरम् ।। ३३

श्रीराम उवाच

मृतेरनन्तरं सर्गो यथा स्मृत्यानुभूयते ।

चिरात्तथानुभवति नातो विश्वमकारणम् ।। ३४

श्रीवसिष्ठ उवाच

महति प्रलये राम सर्वे हरिहरादयः ।

विदेहमुक्ततां यान्ति स्मृतेः क इव संभव ।। ३५

अस्मदादिः प्रबुद्धात्मा किलावश्यं विमुच्यते ।

कथं भवन्तु नो मुक्ता विदेहाः पद्मजातयः ।। ३६

अन्ये त्वमिव ये जीवास्तेषां मरणजन्मसु ।

स्मृतिः कारणतामेति मोक्षाभाववशादिह ।। ३७

भवत्यद्रिर्धराधारो बद्धपीठो नभः शिराः ।

जीवो हि मृतिमूर्च्छान्ते यदन्तः प्रोन्मिषन्निव ।

अनुन्मिषित एवास्ते तत्प्रधानमुदाहृतम् ।। ३८

तद्व्योमप्रकृतिः प्रोक्ता तदव्यक्तं जडाजडम् ।

संस्मृतेरस्मृतेश्चैव क्रम एष भवोदये ।। ३९

बोधोन्मुखत्वे हि महत्तत्प्रबुद्धं यदा भवेत् ।

तदा तन्मात्रदिक्कालक्रिया भूताद्युदेति खात् ।। ४०

तदेवोच्छूनमाबुद्धं भवतीन्द्रियपञ्चकम् ।

तदेव बुध्यते देहः स एषोऽस्यातिवाहिकः ।। ४१

चिरकालप्रत्ययतः कल्पनापरिपीवरः ।

आधिभौतिकताबोधमाधत्ते चैष बालवत् ।। ४२

ततो दिक्कालकलनास्तदाधारतया स्थिताः ।

उद्यन्त्यनुदिता एव वायोः स्पन्दक्रिया इव ।। ४३

वृद्धिमित्थमयं यातो मुधैव भुवनभ्रमः ।

स्वप्नाङ्गनासङ्गसमस्त्वनुभूतोऽप्यसन्मयः ।। ४४

यत्रैव म्रियते जन्तुः पश्यत्याशु तदेव सः ।

तत्रैव भुवनाभोगमिममित्थमिव स्थितम् ।। ४५

व्योमैवानुभवत्यच्छमहं जगदिति भ्रमम् ।

व्योमरूपं व्योमरूपी जीवो जात इवात्मवान् ।। ४६

सुरपत्तनशैलार्कतारानिकरसुन्दरम् ।

जरामरणवैक्लव्यव्याधिसंकटकोटरम् ।। ४७

स्वभावाभावसंरम्भस्थूलसूक्ष्मचराचरम् ।

साव्ध्यद्व्युर्वीनदीशाहोरात्रिकल्पक्षणक्षयम् ।। ४८

अहं जातोऽमुना पित्रा किलात्रेत्याप्तनिश्चयम् ।

इयं माता धनमिदं ममेत्युदितवासनम् ।। ४९

सुकृतं दुष्कृतं चेदं ममेति कृतकल्पनम् ।

बालोऽभूवमहं त्वद्य युवेति विलसद्धृदि ।। ५

प्रत्येकमेवमुदितः संसारवनखण्डकः ।

ताराकुसुमितो नीलमेघचञ्चलपल्लवः ।। ५१

चरन्नरमृगानीकः सुरासुरविहंगमः ।

आलोककौसुमरजाः श्यामागहनकुञ्जकः ।। ५२

अब्धिपुष्करिणीपूर्णो मेर्वाद्यचललोष्टकः ।

चित्तपुष्करबीजान्तर्निलीनानुभवाङ्कुरः ।। ५३

यत्रैष म्रियते जीवस्तत्रैवं पश्यति क्षणात् ।

प्रत्येकमुदितेष्वेवं जगत्खण्डेषु भूरिशः ।। ५४

कोटयो ब्रह्मरुद्रेन्द्रमरुद्विष्णुविवस्वताम् ।

गिर्यब्धिमण्डलद्वीपलोकान्तरदृशां गताः ।। ५५

याता यास्यन्ति यान्त्येता दृष्टयो नष्टरूपिणीः ।

या ब्रह्मण्युपबृंहाढ्यास्ताः के गणयितुं क्षमाः ।। ५६

एवं कुड्यमयं विश्वं नास्त्येव मननादृते ।

मनने चलमेवान्तस्तदिदानीं विचारय ।। ५७

यदेव तच्चिदाकाशं तदेव मननं स्मृतम् ।

यदेव च चिदाकाशं तदेव परमं पदम् ।। ५८

यदेवाम्बु स आवर्तो नत्वस्यावर्त वस्तु सन् ।

द्रष्टैवास्ते दृश्यमिव दृश्यं नत्वस्ति वस्तु सत् ।। ५९

चिद्व्योम्नो भूतनभसि कचनं यन्मणेरिव ।
तज्जगद्भाविनानासत्तत्त्वं श्वभ्रमिवाम्बरे ।। ६०
मद्बुद्धार्थो जगच्छब्दो विद्यते परमामृतम् ।
त्वद्बुद्धारर्थस्तु नास्त्येव त्वमहंशब्दकादपि ।। ६१

तस्माल्लीलासरस्वत्यावाकाशवपुषौ स्थिते ।
सर्वगे परमात्माच्छे सर्वत्राप्रतिघेऽनघे ।। ६२
यत्र यत्र सदा व्योम्नि यथाकामं यथेप्सितम् ।
उदयं कुरुतस्तेन तद्देहेऽस्ति गतिस्तयोः ।। ६३
सर्वत्र संभवति चिद्गगनं तदत्र
सद्वेदनं कलनमामननं विसारि ।
तच्चातिवाहिकमिहाहुरकुड्यमेव
देहं कथं क इव तं वद किं रुणद्धि ।। ६४
इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये उत्पत्तिप्रकरणे लीलोपाख्याने
समरसमनन्तरसंस्मृत्यनुभववर्णनं नाम चत्वारिंशः सर्गः ।।४०।।